# अकलंक स्तोत्रम्

## शार्दूलविक्रीडित छन्दः

त्रैलोक्यं सकलं त्रिकालविषयं सालोकमालोकितं,
साक्षाद् येन यथा स्वयं करतले रेखात्रयं सांगुलि।
रागद्वेषभयामयान्तक जरा लोलत्व लोभादयो,
नालं यत्पद लङ्घनाय स महादेवो मया वंद्यते॥१॥

दग्धं येन पुरत्रयं शरभुवा तीव्रार्चिषा वह्निना,
यो वा नृत्यति मत्तवत्पितृवने यस्यात्मजो वा गुहः।
सोऽयं किं मम शङ्करो भय तृषा रोषार्ति मोहक्षयं,
कृत्वा यः स तु सर्व वित्तनुभृतां क्षेमंकरः शङ्करः॥२॥

यत्नाद्येन विदारितं कररुहै दैंत्येन्द्र वक्षःस्थलं,
सारथ्येनधनञ्जयस्य समरे योऽमारयत् कौरवान्।
नासौ विष्णुरनेककालविषयं यज्ज्ञानमव्याहतं,
विश्वं व्याप्य विजृम्भते स तु महाविष्णुः सदेष्टो मम॥३॥

उर्वश्यामुदपादि रागबहुलं चेतो यदीयं पुनः,
पात्री दण्ड कमण्डलु प्रभृतयो यस्याकृतार्थ स्थितिम्।
आविर्भावयितुं भवन्ति स कथं ब्रह्मा भवेन्मादृशां,
क्षुत्तृष्णा श्रमरागरोगरहितो ब्रह्मा कृतार्थोऽस्तु नः॥४॥

यो जग्ध्वा पिशितं समत्स्यकवलं जीवं च शून्यं वदन्,
कर्ता कर्मफलं न भुङ्क्त इति यो वक्ता स बुद्धः कथम्।
यज्ज्ञानं क्षणवर्ति वस्तु सकलं ज्ञातुं न शक्तं सदा,
यो जानन्युगपज्जगत्त्रयमिदं साक्षात् स बुद्धो मम॥५॥

## स्रग्धरा छंदः

ईशः किं छिन्नलिङ्गो यदि विगतभयः शूलपाणिः कथं स्यात्,
नाथः किं भैक्ष्य चारी यतिरिरिति स कथं साङ्गनः सात्मजश्च।
आर्द्रांजः किन्त्वजन्मा सकल विदिति किं वेत्ति नात्मान्तरायं,
संक्षेपात्सम्यगुक्तं पशुपतिमपशुः कोऽत्र धीमानुपास्ते॥६॥

ब्रह्मा चर्माक्षसूत्री सुरयुवतिरसावेशविभ्रान्तचेताः,
शम्भुः खट्वाङ्गधारी गिरिपति तनयापाङ्ग लीनानुविद्धः।
विष्णुश्चक्राधिपः सन्दुहितरमगमद् गोपनाथस्य मोहा,
दर्हन्विध्वस्तरागो जितसकलभयः कोऽयमेष्वाप्तनाथः॥७॥

एको नृगत्यति विप्रसार्यकुकुभां चक्रे सहस्त्रं भुजा
नेकः शेषभुजङ्गभोगशयने व्यादाय निद्रायते।
दृष्टुं चारुतिलोत्तमामुखमगादेकश्चतुर्वक्त्रता
मेतं मुक्तिपथं वदन्ति विदुषामित्येतदत्यद्भुतम्॥८॥

यो विश्वं वेद वेद्य जनन जलनिधेर्भंगिनः पारदृश्वा,
पौर्वापर्याविरुद्धं वचनमनुपम निष्कलङ्कं यदीयम्।
तं वन्दे साधुवंद्यं सकलगुणनिधिं ध्वस्तदोषद्विषन्तं,
बुद्धं वा वर्द्धमानं शतदलनिलयं केशवं वा शिवं वां॥९॥

माया नास्ति जटा कपाल मुकुटं चन्द्रो न मूर्धावली,
खट्वाङ्ग न च वासुकिर्न च धनुःशूलं न चोग्रं मुखम्।
कामो यस्य न कामिनी न च वृषो गीतं न नृत्यं पुनः,
सोऽस्मान् पातु निरंजनो जिनपतिः सर्वत्र सूक्ष्मः शिवः॥१०॥

नो ब्रह्माङ्कितभूतलं न च हरेःशम्भोर्न मुद्रांकितं,
नो चन्द्रार्ककरांकितं सुरपतेर्वज्रांकितं नैव च।
षड्वक्त्राङ्कितबौद्धदेव हुतभुग्य-क्षोरगैर्नांकितं,
नग्नं पश्यत वादिनो जगदिदं जैनेंद्रमुद्राङ्कितम्॥११॥

मौञ्जी दण्ड कमण्डलु प्रभृतयो ना लाञ्छनं ब्रह्मणो,
रुद्रस्यापि जटा कपाल मुकुट कौपीन खट्वांगनाः।
विष्णोश्चक्र गदादि शङ्ख मतुलं बुद्धस्य रक्ताम्बरं,
नग्नं पश्यत वादिनो जगदिदं जैनेन्द्र मुद्राङ्कितम्॥१२॥

नाहंकारवशीकृतेन मनसा न द्वेषिणा केवलं,
नैरात्म्यं प्रतिपद्य नश्यति जने कारुण्यबुद्ध्या मया।
राज्ञः श्रीहिमशीतलस्य सदसि प्रायो विदग्धात्मनो,
बौद्धौघान्सकलान् विजित्य स घटः पादेन विस्फालितः॥१३॥

खट्वाङ्गं नैव हस्ते न च हृदि रचिता लम्बते मुण्डमाला,
भस्माङ्गं नैवशूलं न च गिरिदुहिता नैव हस्ते कपालं।
चन्द्रार्द्धं नैव मूर्धन्यपिवृषगमनं नैव कण्ठे फणीन्द्रः
तं वन्दे त्यक्तदोषं भवभयमथनं चेश्वरंदेवदेवं॥१४॥

किं वाद्यो भगवानमेयमहिमा देवोऽकलङ्कः कलौ,
काले यो जनतासु धर्मनिहितो देवोऽकलङ्कोः जिनः।
यस्य स्फारविवेकमुद्रलहरीजाले प्रमेयाकुला,
निर्मग्ना तनुतेतरा भगवती ताराशिरः कम्पनम्॥१५॥

सा तारा खलुदेवताभगवती मन्याऽपि मन्यामहे,
षणमासावधिजाड्य सांख्य भगवद् भटट्ाकलङ्कप्रभोः।
वाक्कल्लोलपरंपराभिरमते नूनं मनोमज्जन
व्यापारं सहतेस्म विस्मितमतिः संताडितेतस्ततः॥१६॥

॥ इत्यकलंक स्तोत्रम्॥